**24R/23R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : मे – २०२५**

**सत्र १ ले**

**विषयः पञ्चतन्त्र–काकोलूकीय (24R413/23R412)**

| दिनांक : १५/०५/२०२५ | गुण :४० | वेळ : दु. २.०० ते ३.३० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १) द्वौ गद्यांशौ माध्यमभाषया अनुवदत।** (२०)

१. न च कश्चिदनधिगमनीयो नामास्त्यापदाम्। उक्तञ्च–
रामस्य व्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम्।
नाट्याचार्यकमर्जुनस्य पतनं सञ्चिन्त्य लङ्केश्वरे सर्वः कालवशाज्जनोऽत्र सहते कः कं परित्रायते ।।
क्व स दशरथः स्वर्गे भूत्वा महेन्द्रसुहृद् गतः क्व स जलनिधेर्वेलां बद्ध्वा नृपः सगरस्तथा।
क्व स करतलाज्जातो वैन्यः सूर्यतनुर्मनुर्ननु बलवता कालेनैते प्रबोध्य निमीलिताः ।।

२. मुनिराह – 'वायो ! त्वत्तोऽप्यधिकोऽस्ति कश्चित् ?' पवनेनोक्तं – 'मत्तोऽप्यधिकोऽस्ति पर्वतः, तेन संस्तभ्य बलवानप्यहं ध्रियेे।' अथ मुनिः पर्वतमाहूय कन्यामुवाच – 'पुत्रिके ! किं त्वामस्मै प्रयच्छामि ?' सा प्राह– 'तात! कठिनात्मकोऽयं स्तब्धश्च। तदन्यस्मै देहि माम्।' मुनिना पर्वतः पृष्टः– 'भो पर्वतराज ! त्वत्तोऽप्यधिकोऽस्ति कश्चित् ?'। गिरिणोक्तं – 'मत्तोप्यधिकाः सन्ति मूषका ये मच्छरीरं बलाद्विदारयन्ति।' ततो मुनिर्मूषकमाहूय तस्या अदर्शयत्। आह च– 'पुत्रिके! त्वामस्मै प्रयच्छामि ?' किमेष प्रतिभाति ते मूषिकराजः ?'। सापि दृष्ट्वा 'स्वजातीय एष' इति मन्यमाना पुलकोद्भूषितशरीरोवाच– 'तात! मां मूषिकां कृत्वाऽस्मै प्रयच्छ, येन स्वजातिविहितं गृहिणीधर्ममनुतिष्ठामि ।'

३. लुब्धकेन ततो मुक्ता दृष्ट्वाऽग्नौ पतितं पतिम्। कपोती विललापातः शोकसन्तापमानसा ।।
न कार्यमद्य मे नाथ! जीवितेन त्वया विना। दीनायाः पतिहीनायाः किं नार्या जीविते फलम् ।।
मानो दर्पस्त्वहङ्कारः कुलपूजा च बन्धुषु। दासभृत्यजनेष्वज्ञो वैधव्येन प्रणश्यति ।।
एवं विलप्य बहुशः कृपणं भृशदुःखिता। पतिव्रता ससन्दीप्तं तमेवाग्निं विवेश सा।।
ततो दिव्याम्बरधरा दिव्याभरणभूषिता। भर्तारं सा विमानस्थं ददर्श स्वं कपोतिका ।।

**प्र. २) एकं वाक्यं ससन्दर्भं स्पष्टीकुरुत।** (१०)

१. शत्रवोऽपि हितायैव विवदन्तः परस्परम्।
२. सर्वं वै मूर्खमण्डलम्।

**प्र. ३) कामपि एकां कथां स्वशब्देन संस्कृतभाषया लिखत।** (१०)

----------